# M.A. 1st Semester Examination, 2011

## SANSKRIT

PAPER – SAN- 101

*Full Marks* : 40

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. अधोनिर्दिष्टेषु मन्त्रेषु किमपि मन्त्रद्वयमृषिच्छन्दो-देवतानिर्देशपूर्वकं सायणमनुश्रित्य सरलसुरगिरा-देवनागरीलिप्यां व्याख्यायताम्- 6 x 2

   (*a*) अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ।
   यशसं वीरवत्तमम् ॥

( Turn Over )

(*b*) वायुवा याहि दर्शतेमे सोमा अरंकृताः ।
तेषां पाहि श्रुधी हवम् ।।

(*c*) मित्रं हुवे पूतदक्षं वरूणं च रिशादसम् ।
धियं घृताचीं साधन्ता ।।

(*d*) पुरूष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नैनातिरोहति ।।

(*e*) नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः —
किमासीद्गहनं गभीरम् ।।

2. अधोलिखितं भाष्यवचनमेकं संस्कृतभाषायां देवनागरीलिपिमनुश्रित्य व्याख्यायताम् — 6 x 1

(*a*) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या सूत्रगता - तृतीया ।

(*b*) एतस्या ऋच ऐन्द्रवायवग्रहे द्वितीयपुरोऽनु–वाक्यारूपेण विशेषविनियोगः ।

*अथवा*

अधोनिर्दिष्टयोः मन्त्रयोः कस्यचिद एकस्य भावार्थः संस्कृतभाषायां देवनागरीलिपिमाश्रित्य लेख्यः —

(*a*) येनदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥

(*b*) कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ॥

3. अधस्तनेषु पदेषु कस्यचिद् द्वयोः व्याकरणप्रक्रियया साधनरीतिः संस्कृतभाषायां प्रदर्श्यताम् — 2 x 2

(*i*) घृताची

(*ii*) दोषावस्तः

(*iii*) दीदिविम्

(*iv*) वक्षति

(*v*) दर्शत ।

4. कालसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् । 8 x 1

*अथवा*

इन्द्रवरूणयोः कस्यचिदेकस्य देवस्य वेदगतचारित्रिकं वैशिष्ट्यं विलिख्यताम् ।

5. शुनः शेपोपाख्यानं कस्मिन् ब्राह्मणभागान्तर्गतम् ? शुनः शेपः कः ? इति विलिख्य शुनः शेपोपाख्यानस्य वैशिष्ट्यं प्रतिपाद्यताम् । 10

*अथवा*

अधस्तनयोः द्वयोः व्याख्यानं (देवनागरीलिप्या) करणीयम् —

(*i*) तस्य वा एतस्य ब्रह्मयज्ञस्य चत्वारो वषट्काराः ।

(*ii*) नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम ।
पापो नृषद्वरो जन इन्द्र इच्चरतः सखा ।।

---